
# BILVASTOTTARA SATANAMA STOTRAM

By : SRI BRINGRITI



R. L. BHAT

## 'बेलपत्र' सतनाम स्त्रोत्रम

तिथी - माघ शुक्ल पक्ष अषटमी १९९८ (1998)

मूल्य

Pt. By : Durga printing, Press, Old Janipur Jammu

# दो शब्द

## राज्ञी सदा भगवती भवतु प्रसन्न :

पूरे तीन वर्ष के पश्चात् आज पुन: अर्ध रात्री श्री महाराज्ञी सेवा संस्था (रजर्स्टड) भवानी नगर, जानीपुरा, जम्मू आप के सम्मुख अपनी शुभकामनाओं के साथ उपस्थित है। इष्ट देव को सन्तुष्ट करने मानसिक शान्ति, तथा हर मनोकामना सिद्धि के लिए पुष्पार्चन एक सरल तथा सुगम मार्ग हैं हम जब भी चाहें हर एक महोत्सव, पर्व पर पुष्पार्चन की पूजा कर सकते हैं।

विष्णु भगवान ने शकंर भगवान को सन्तुषट कराने के लिए "सहस्त्र पुष्पार्चन" किया, परन्तु अन्त में हज़ार पुष्प में एक कम होने पर भक्ति के आवेश में अपना नेत्र कमल हज़ारवें पुष्प के रूप अर्पण किया, जिस के फलस्वरूप विष्णु भगवान को शंकर भगवान ने सुदर्शन चक्र प्रधान किया।

पुष्प दन्ताचार्य ने फूल न मिलने पर फूलों के स्थान पर 32 दांत पुष्पार्चन के रूप में अंपण करते हुये महिम्नस्तोत्र के 32 शलोकों का उच्चारण किया, इन प्रमाणों से स्पष्ठ है पुष्पार्चन की पुजा भारतीय पुजा क्रम में प्राचीन काल से प्रचलित है।

संस्था को आज श्री गोपी नाथ जो जो श्री महा राज्ञा तुलामुला (काश्मीर) और श्री महा राज्ञा पीठ, भवानी नगर, जानीपुर के पुजारी से हमें "वेल-पत्र" शंकर भगवान को अंपण करने के 118 शलोकों की पुस्तक प्राप्त हुई जिस को हम अपने भक्त जनों की सेवा में प्रकाशित करके प्रेम पूर्वक प्रयत्न से श्री गोपी नाथ जी की हार्दिक इच्छा साकार होकर पूर्ण होगी और वही इस संस्था की सेवा को संतोष प्राप्त हो सकेगा।

आशा है जन्ता इस पुस्तक का हार्दिक स्वागत करेंगे।

प्रधान

अर्ध रात्री श्री महाराज्ञा सेवा संस्था (रजर्स्टड)

भवानी नगर जानीपुर जम्मू

त्रिदलं त्रिगुणाकारं त्रिणेत्रं च त्रयायुषम् ।
त्रिजन्म पापसंहारं एकबिल्वं शिवार्पणम् ।। (1) ।।

त्रिशाखैः बिल्वपत्रैः च अच्छिद्रैः कोमलैश्शुभैः ।
तव पूजां करिष्यामि एकबिल्वं शिवार्पणम् ।। (2) ।

सर्वत्रैलोक्यकर्तारं सर्वत्रैलोक्यपालनम् ।
सर्वत्रैलोक्यहर्तारं एकबिल्वं शिवार्पणम् ।। (3) ।।

नागाधिराजवलयं नागहारेण भूषितम् ।
नागकुण्डलसंयुक्तं एकबिल्वं शिवार्पणम् ।। (4) ।।

अक्षमालाधरं रुद्रं पार्वतीप्रियवल्लभम् ।
चन्द्रशेखरमीशानं एकबिल्वं शिवार्पणम् ।। (5) ।।

त्रिलोचनं दशभुजं दुर्गादेहार्धधारिणम् ।
विभूतिचर्चितं देवमेकबिल्वं शिवार्पणम् ।। (6) ।।

त्रिशूलधारिणं देवं नागाभरणसुन्दरम् ।
चन्द्रशेखरमीशानं एकबिल्वं शिवार्पणम् ।। (7) ।।

गङ्गाधराम्बिकानाथं फणिमण्डलमण्डितम् ।
कालकालं गिरीशं च एकबिल्वं शिवार्पणम् ।। (8) ।।

शुद्धस्फटिकसंकाशं शितिकण्ठं कृपानिधिम् ।
सर्वेश्वरं सदा शान्तं एकबिल्वं शिवार्पणम् ॥ (9) ॥

सच्चिदानन्दरूपं च परानन्दमयं शिवम् ।
वागीश्वरं चिदाकाशं एकबिल्वं शिवार्पणम् ॥ (10) ॥

शिपिविष्टं सहस्राक्षं दुन्दुभ्यं च निषङ्गिणम् ।
हिरण्यबाहुं सेनान्यं एकबिल्वं शिवार्पणम् ॥ (11) ॥

अरुणं वामनं तारं वास्तव्यं चैव वास्तवम् ।
ज्येष्ठं कनिष्ठं वैशन्तं एकबिल्वं शिवार्पणम् ॥ (12) ॥

हरिकेशं वनाधीशं उच्चैर्घोषं सनातनम् ।
अघोररूपकं कुम्भं एकबिल्वं शिवार्पणम् ॥ (13) ॥

पूर्वजावरजं याम्यं सूक्ष्मतस्करनायकम् ।
नीलकण्ठं जघन्यं च एकबिल्वं शिवार्पणम् ॥ (14) ॥

सुराश्रयं विषहरं वर्मिणं च वरूथिनम् ।
महासेनं महावीरं एकबिल्वं शिवार्पणम् ॥ (15) ॥

कुमारं कुशलं कूप्यं वदान्यं च महारथम् ।
पार्यापार्यं च दिव्यं च एकबिल्वं शिवार्पणम् ॥ (16) ॥

दशकर्ण ललाटाश्रें पञ्चववत्रं सदाशिवम् ।
अशेषपापसंहारं एकबिल्वं शिवार्पणम् ।। (17) ।।

नीलकण्ठं जगद्वन्द्यं नीलानाथं महेश्वरम् ।
महापापहरं शम्भुं एकबिल्वं शिवार्पणम् ।। (18) ।।

चूडामणीकृतविधुं बलयीकृतवासुकिम् ।
कैलासनिलयं भीमं एकबिल्वं शिवार्पणम् ।। (19) ।।

कर्पूरकुन्दधवलं नरकार्णवतारकम् ।
करुणामृतसिंघुं च एकबिल्वं शिवार्पणम् ।। (20) ।।

महादेवं महात्मानं भुजंगाधिपकंकणम् ।
महापापहरं देवं एकबिल्वं शिवार्पणम् ।। (21) ।।

भूतेशं खण्डपरशुं वामदेवं पिनाकिनम् ।
वामे शक्तिधरं श्रिष्ठं एकबिल्वं शिवार्पणम् ।। (22) ।।

फालेक्षणं विरूपाक्षं श्रीकण्ठं भक्तवत्सलम् ।
नीललोहित खट्वाङ्गं एकबिल्वं शिवार्पणम् ।। (23) ।।

कैलासवासिनं भीमं कठोरं त्रिपुरान्तकम् ।
वृषाङ्कं वृषभारूढं एकबिल्वं शिवार्पणम् ।। (24) ।।

सामप्रियं स्वरमयं भस्मोद्धलितविग्रहम् ।
मृत्युञ्जयं लोकनाथं एकबिल्वं शिवार्पणम् ।। (25) ।।

दरिद्रदुः स्वहरणं रविचन्द्रानलाक्षकम् ।
मृगापाणिं चन्द्रमौळिं एकबिल्वं शिवार्पणम् ।। (26) ।।

सर्वलोक-भयाकारं सर्वलोकैकसाक्षिणम् ।
निर्मल निर्गुणाकारं एकबिल्वं शिवार्पणम् ।। (27) ।।

सर्वतत्त्वात्मकं साम्बं सर्वतत्त्वविदूरकम् ।
सर्वतत्त्वस्वरूपं च एकबिल्वं शिवार्पणम् ।। (28) ।।

सर्वलोकगुरुं स्थाणुं सर्वलोकवरप्रदम् ।
सर्वलोकैकनेत्रं च एकबिल्वं शिवार्पणम् ।। (29) ।।

मन्मथोद्धारणं शैवं भवं भर्गपरात्मकम् ।
कमलाप्रियपूज्यं च एकबिल्वं शिवार्पणम् ।। (30) ।।

तेजोमयं महाभीमं स्मरभस्मविलेपनम् ।
भवरोगविनाशं च एकबिल्वं शिवार्पणम् ।। (31) ।।

स्वर्गापवर्गफलदं घुनाथवरप्रदम् ।
नगराजसुताकान्तं एकबिल्वं शिवार्पणम् ।। (32) ।।

मञ्जीरपादयुगलं शुभलक्षणलधकम् ।
फणिराजविराजं च एकबिल्वं शिवार्पणम् ।। (33) ।।

निरामयं निराधारं निस्सङ्गं निष्प्रपञ्चकम् ।
तेजोरूपं महारौद्रं एकबिल्वं शिवार्पणम् ।। (34) ।।

सर्वलोकैकपितरं सर्वलोकैकमातरम् ।
सर्वलोकैकनाथं च एकबिल्वं शिवार्पणम् ।। (35) ।।

चित्राल्बरं चिदाभसं वृषभेश्वरवाहनम् ।
नीलग्रीवं चतुर्वक्त्रं एकबिल्वं शिवार्पणम् ।। (36) ।।

रक्तकञ्चुकरत्नेश रत्नकुण्डलमण्डितम् ।
नवरत्नकिरीटञ्च एकबिल्वं शिवार्पणम् ।। (37) ।।

दिव्यरत्नाङ्गलीकर्णरत्नाभरणभूषितम् ।
नानारत्नं मणिमयं एकबिल्वं शिवार्पणम् ।। (38) ।।

रत्नाङ्गुलीयविलसत्करशाखानखप्रभम् ।
भक्तमानसगेहं च एकबिल्वं शिवार्पणम् ।। (39) ।।

वामाङ्गभागविलसदम्बिकावीक्षणप्रियम् ।
पुण्डरीकनिभेक्षञ्च एकबिल्वं शिवार्पणम् ।। (40) ।।

संपूर्णकामदं सौख्यं भक्तेष्टफलपूरकम् ।
सौभाग्यदं हितकरं एकबिल्वं शिवार्पणम् ।। (41) ।।

नानाशास्त्रगुणोपेतं स्फुरन्मङ्गलविग्रहम् ।
विद्याविभेदरहितं एकबिल्वं शिवार्पणम् ।। (42) ।।

अप्रमेयगुणाधारं वेदकृद्रूपविग्रहम् ।
धर्माधर्मप्रवृत्तं च एकबिल्वं शिवार्पणम् ।। (43) ।।

गौरीविलाससदनं जीवं जीवपितामहम् ।
कल्पान्तभैरवं शुभ्रं एकबिल्वं शिवार्पणम् ।। (44) ।।

सुखदं सुखनाशं च दुःखदं दुःखनाशनम् ।
दुःखानतानां भद्रं च एकबिल्वं शिवार्पणम् ।। (45) ।।

सुखरूपं रूपनाशं सर्वधर्मफलप्रदम् ।
अतीन्द्रियं महामायं एकबिल्वं शिवार्पणम् ।। (46) ।।

सर्वपक्षिमृगाकारं सर्वपक्षिमृगाधिपम् ।
सर्वपक्षिमृगाधारं एकबिल्वं शिवार्पणम् ।। (47) ।।

जीवाध्यक्षं जीववर्यं जीवजीवनरक्षकम् ।
जीवकृज्जीवहरणं एकबिल्वं शिवार्पणम् ।। (48) ।।

विश्वात्मानं विश्वबन्द्यं वज्राङ्कं वज्रहस्तकम् ।
वज्रेशं वज्रभूषञ्च एकबिल्वं शिवार्पणम् ॥ (49) ॥

गणाधिपं गणाध्यक्षं प्रलयानलनाशकम् ।
दिगम्बरं क्षोभनाशं एकबिल्वं शिवार्पणम् ॥ (50) ॥

त्र्यंबकं च मृडं शूलं अरिषड्वर्गनाशकम् ।
जितेन्द्रियं वीरभद्रं एकबिल्वं शिवार्पणम् ॥ (51) ॥

कुन्देन्दुशङ्खधवलं भगनेत्रभिदुज्वलम् ।
कालाग्निरुद्रं सर्वेशं एकबिल्वं शिवार्पणम् ॥ (52) ॥

कम्बुग्रीवं कम्बुकण्ठं धैर्यदं धैर्यवर्धकम् ।
शार्दूलचर्मवसनं एकबिल्वं शिवार्पणम् ॥ (53) ॥

जगदुत्पत्तिहेतुञ्च जगत्प्रलयकारणम् ।
पूर्णानन्दस्वरूपं च एकबिल्वं शिवार्पणम् ॥ (54) ॥

स्वर्णकेशं महत्तेजः पुण्यश्रवणकीर्तनम् ।
ब्रह्माण्डनायकं तारं एकबिल्वं शिवार्पणम् ॥ (55) ॥

मन्दारमूलनिलयं मन्दारकुसुमप्रियम् ।
बृन्दारकप्रियतरं एकबिल्वं शिवार्पणम् ॥ (56) ॥

महेन्द्रियं महाबाहुं विश्वासपरिपूर्णकम् ।
सुलभासुलभं लभ्यं एकबिल्वं शिवार्पणम् ।। (57) ।।

बीजाधारं बीजरूपं निर्बीजं बीजवृद्धिदम् ।
परेशं बीजनाशं च एकबिल्वं शिवार्पणम् ।। (58) ।।

युगाकारं युगाधीशं युगकृद्युगनाशकम् ।
युगेशं युगनाशं च एकबिल्वं शिवार्पणम् ।। (59) ।।

धूर्जटिं पिङ्गलजटं जटामण्डलमण्डितम् ।
कर्पूरगौरं गौरीशं एकबिल्वं शिवार्पणम् ।। (60) ।।

सुरावासं जनावासं योगीशं योगिपुङ्गवम् ।
योगदं योगिनां सिंहं एकबिल्वं शिवार्पणम् ।। (61) ।।

उत्तमानुत्तमं तत्त्वं अन्धकासुरसूदनम् ।
भक्तकल्पद्रुमं स्तव्यं एकबिल्वं शिवार्पणम् ।। (62) ।।

विचित्रमाल्यवसनं दिव्यचन्दनचर्चितम् ।
विष्णुब्रह्मादिवन्द्यं च एकबिल्वं शिवार्पणम् ।। (63) ।।

कुमारपितरं देवं सितचन्द्रं कलानिधिम् ।
ब्रह्मशत्रुं जगन्मित्रं एकबिल्वं शिवार्पणम् ।। (64) ।।

लावण्यमधुराकारं करुणारसवारिधिम् ।
भुवोर्मध्ये सहस्रार्चिः एकबिल्वं शिवार्पणम् ।। (65) ।।

जटाधरं पावकाक्षं ऋक्षेशं भुवनाश्रयम् ।
कामदं सर्वदागम्यं एकबिल्वं शिवार्पणम् ।। (66) ।।

शिवं शान्तं उमानाथं महाध्यानपरायणम् ।
ज्ञानप्रदं कृत्तिवासं एकबिल्वं शिवार्पणम् ।। (67) ।।

वासुक्युरगहारं च लोकानुग्रहकारणम् ।
ज्ञानप्रदं कृत्तिधरं एकबिल्वं शिवार्पणम् ।। (68) ।।

शशाङ्कधारिणं भर्गं सर्वलोकैकशङ्करम् ।
शुद्धं च शाश्वतं नित्यं एकबिल्वं शिवार्पणम् ।। (69) ।।

शरणागतदीनार्तिं परित्राणपरायणम् ।
गम्भीरं च वषट्कारं एकबिल्वं शिवार्पणम् ।। (70) ।।

भोक्तारं भोजनं भोज्यं जेतारं जितमानसम् ।
करणं कारणं जिष्णुं एकबिल्वं शिवार्पणम् ।। (71) ।।

क्षेत्रज्ञं क्षेत्रपालञ्च परार्थैकप्रयोजनम् ।
व्योमकेशं भीमवेषं एकबिल्वं शिवार्पणम् ।। (72) ।।

भावज्ञं तरुणोपेतं क्षोदिष्टं यमशासकम् ।
हिरण्यगर्भं हेमाङ्गं एकबिल्वं शिवार्पणम् ॥ (73) ॥

दक्षं चामुण्डजनकं मोक्षदं मोक्षनायकम् ।
हिरण्यदं हेमरूपं एकबिल्वं शिवार्पणम् ॥ (74) ॥

महाश्मशाननिलयं प्रसन्नस्फटिकप्रभम् ।
वेदाश्वं वेदरूपञ्च एकबिल्वं शिवार्पणम् ॥ (75) ॥

स्थिरं स्वधर्ममानाभं ब्रह्माण्यञ्चाश्रयं विभुम् ।
जगन्निवासं प्रथमं एकबिल्वं शिवार्पणम् ॥ (76) ॥

रुद्राक्षमालाभरणं रुद्राक्षप्रियवत्सलम् ।
रुद्राक्ष-भक्तसंस्तव्यं एकबिल्वं शिवार्पणम् ॥ (77) ॥

फणीन्द्रविलसत्कण्ठं अहीन्द्रवलयान्वितम् ।
मुनिवन्द्यं मुनिश्रेष्ठं एकबिल्वं शिवार्पणम् ॥ (78) ॥

नागेन्द्रविलसत्कर्णं भुजङ्गाभरणप्रियम् ।
दक्षाध्वरविनाशञ्च एकबिल्वं शिवार्पणम् ॥ (79) ॥

मृगेन्द्रचर्मवसनं मुनिसाध्यैकजीवनम् ।
सर्वदेवादिपूज्यञ्च एकबिल्वं शिवार्पणम् ॥ (80) ॥

निधनेशं धनाधीशं अपमृत्युविनाशनम् ।
लिङ्गमूर्तिमलिङ्गाख्यं एकबिल्वं शिवार्पणम् ।। (81) ।।

भक्तकल्याणदं व्यस्तं वेदवेदान्तसंस्तुतम् ।
कल्पकृत्कल्पनाशञ्च एकबिल्वं शिवार्पणम् ।। (82) ।।

घोरपातकदावान्गिं जन्मकर्मविवर्जितम् ।
कपालमालाभरणं एकबिल्वं शिवार्पणम् ।। (83) ।।

मातङ्गचर्मवसनं विराड्रूपविधारकम् ।
विष्णुक्रान्तमनन्तञ्च एकबिल्वं शिवार्पणम् ।। (84) ।।

यज्ञकर्मफलाध्यक्षं यज्ञविघ्नविनाशकम् ।
यज्ञेशं यज्ञभोक्तारं एकबिल्वं शिवार्पणम् ।। (85) ।।

कालाधीशं त्रिकालज्ञं दुष्टनिग्रहकारकम् ।
योगिमानसपूज्यञ्च एकबिल्वं शिवार्पणम् ।। (86) ।।

महोन्नतं महाकायं महोदारं महाभुजम् ।
महावक्त्रं महावृद्धं एकबिल्वं शिवार्पणम् ।। (87) ।।

सुनेत्रं सुललाटञ्च सर्वं भीमपराक्रमम् ।
महेश्वरं शिवतरं एकबिल्वं शिवार्पणम् ।। (88) ।।

समस्तजगदाधारं समस्तगुणसागरम् ।
सत्यं सत्यगुणोपेतं एकबिल्वं शिवार्पणम् ।। (89) ।।

माघकृष्णचतुर्दश्यां पूजार्हं च जगद्गुरुम! ।
दुर्लभं सर्वदेवानां एकबिल्वं शिवार्पणम् ।। (90) ।।

सालग्रामेषु विप्राणां तटाकशतकूपयोः ।
कोटिकन्यामहादानं एकबिल्वं शिवार्पणम् ।। (91) ।।

कन्यां कनकसंपन्नां सर्वाभरणभूषिताम् ।
दास्यामि विष्णवे तुभ्यं ब्रह्मलोकजिगीषया ।।
विश्वंभरा सर्वभूताः साक्षिणः सर्वदेवताः ।
इमां कन्यां प्रदास्यामि पितॄणां तारणाय च ।।
कन्ये ममाग्रतो भूयाः त्वद्दानान्मोक्षमाप्नुयाम् ।
तुभ्यं इमां कन्यां प्रजासत्वकर्मभ्यः प्रतिपादयामि ।।

दर्शनं बिल्ववृक्षस्य स्पर्शनं पापनाशनम् ।
अघोरपापसंहारं एकबिल्वं शिवार्पणम् ।। (92) ।।

तुलसीनीलनिर्गुण्डी जम्बीरामलकं तथा ।
अघोरपापसंहारं एकबिल्वं शिवार्पणम् ।। (93) ।।

अखण्डबिल्वपत्रैश्च पूजयेन्नन्दिकेश्वरम् ।
मुच्यते सर्वपापेभ्यः एकबिल्वं शिवार्पणम् ।। (94) ।।

सालंकृतं सतां वृत्तं कन्याकोटिसहस्रकम् ।
साम्राज्यपृथ्वीदान च एकबिल्वं शिवार्पणम् ।। (95) ।।

दशकोटितुरङ्गाणां अश्वमेध-सहस्रकम् ।
तुलाभारं शतावर्ति एकबिल्वं शिवार्पणम् ।। (96) ।।

चतुर्वेदसहस्राणि भारतादि पुराणकम् ।
साम्राज्यं पृथ्वीदानं एकबिल्वं शिवार्पणम् ।। (97) ।।

सर्वरत्नानि मेरुं च काञ्चनं दिव्यवस्त्रकम् ।
सवत्सधेनुकोटीनां एकबिल्वं शिवार्पणम् ।। (98) ।।

अष्टोत्तरशतं बिल्वं योऽर्पयेल्लिङ्गमस्तके ।
अथर्वोक्तं फलं लभ्यं एकबिल्वं शिवार्पणम् ।। (99) ।।

काशीक्षेत्रनिवासश्च कालभैरवदर्शनम् ।
अघोरपापसंहारं एकबिल्वं शिवार्पणम् ।। (100) ।।

अष्टोत्तरशतश्लोकैः स्तोत्राद्यैः पूजयेद्यथा ।
त्रिसन्ध्यं मोक्षमाप्नोति एकबिल्वं शिवार्पणम् ।। (101) ।।

दन्तिकोटिसहस्राणां भूहिरण्यसहस्रकम् ।
सर्वक्रतुमयं पुण्यं एकबिल्वं शिवार्पणम् ।। (102) ।।

पुत्रपौत्रादिकं भोगं भुक्तवा चात्र यथेप्सितम् ।
अन्ते च शिवसायुज्यं एकबिल्वं शिवार्पणम् ।। (103) ।।

विप्रकोटिसहस्राणां भक्तदानाच्च यत्फलम् ।
तत्फलं प्राप्नुयात्सत्यं एकबिल्वं शिवार्पणम् ।। (104) ।।

शिवनामकीर्तनं यश्च शिवपादाम्बु यः पिबेत् ।
जीवन्मुक्तो भवेत्सत्यं एकबिल्वं शिवार्पणम् ।। (105) ।।

अनेकदानफलदं अनन्तसुकृतार्पकम् ।
तीर्थयात्राखिलं पुण्यं एकबिल्वं शिवार्पणम् ।। (106) ।।

त्वं मां पालय सर्वत्र पदध्यानं कृतं तव ।
भावनं शाङ्करं नित्यं एकबिल्वं शिवार्पणम् ।। (107) ।।

सत्यं च शिवमद्वैतं सच्चिदानन्दविग्नहम् ।
नटराजं चिदाकाशं एकबिल्वं शिवार्पणम् ।। (108) ।।

एककालं पठेन्नित्यं सर्वशत्रनिवारणम् ।
द्विकालं यः पठेन्नित्यं सर्वभीतिनिवारणम् ।। (109) ।।

त्रिकाले च पठेन्नित्यं मनोवाञ्छाफलप्रदम् ।
अचिरात्कार्यसिद्धिं च लभते नात्र संशयः ।। (110) ।।

एककालं द्विकालं चा त्रिकालं यः पठेन्नरः ।
लक्ष्मीप्राप्तिः शिवावासः शिवेन सह मोदते ।। (111) ।।

कोटिजन्मकृतं पापं अर्चनेन विनश्यति ।
सप्तजन्मकृतं पापं कीर्तनेन विनश्यति ।। (112) ।।

जन्मान्तरकृतं पापं श्रवणेन विनश्यति ।
दिवारात्रिकृतं पापं दर्शनेन विनश्यति ।। (113) ।।

क्षणे क्षणे कृतं पापं स्मरणेन विश्यति ।
पुस्तकं धारयेद्दहे आरोग्यं भयनाशकम् ।। (114) ।।

त्रयोदशोत्तरशतश्लोकैः संघटितं वरम् ।
एकबिल्वार्पणस्तोत्रं यः पठेत् शिवसन्निधौ ।। (115) ।।

स सर्वसिद्धिमाप्नोति आयुः कीर्ति च विन्दति ।
सवः संपूज्यते लोके शिवलोके महीयते ।। (116) ।।

अष्टम्यां सोमवारे च प्रदोष-शिवरात्रिषु ।
आर्द्रायां गुरुवारे च त्रिदलैः बिल्वपत्रकैः ।। (117) ।।

अष्टोत्तरशतं कार्यगर्चनं शिवमस्तके ।
तेन स्वर्गमवाप्नोति शिवसायुज्य माप्नुयात् ।। (118) ।।